# ShrI Batukabhairava Ashtottarashatanama Stotram 2

# શ્રીબટુકભૈરવાષ્ટોત્તરશતનામસ્તોત્રમ્ ૨

## Document Information

Text title : Batukabhairava Ashtottarashatanama Stotram 2

File name : baTukabhairavAShTottarashatanAmastotram2.itx

Category : aShTottarashatanAma, shiva

Location : doc_shiva

Transliterated by : Gopal Upadhyay gopal.j.upadhyay at gmail.com

Proofread by : Gopal Upadhyay, Psa Easwaran psaeaswaran at gmail.com

Source : kAlasaNkarShaNatantra

Latest update : October 15, 2016

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 14, 2021

*sanskritdocuments.org*

# શ્રીબટુકભૈરવાષ્ટોત્તરશતનામસ્તોત્રમ્ ૨

શ્રીગણેશાય નમઃ ।
શ્રીઉમામહેશ્વરાભ્યાં નમઃ ।
શ્રીગુરવે નમઃ ।
શ્રીભૈરવાય નમઃ ।

ૐ અસ્ય શ્રીબટુકભૈરવસ્તોત્રમન્ત્રસ્ય કાલાગ્નિરુદ્ર ઋષિઃ ।
અનુષ્ટુપ્ છન્દઃ । આપદુદ્ધારકબટુકભૈરવો દેવતા । હ્રીં બીજમ્ ।
ભૈરવીવલ્લભઃ શક્તિઃ । નીલવર્ણો દણ્ડપાણિરિતિ કીલકમ્ ।
સમસ્તશત્રુદમને સમસ્તાપન્નિવારણે સર્વાભીષ્ટપ્રદાને ચ વિનિયોગઃ ॥

ઋષ્યાદિ ન્યાસઃ -
ૐ કાલાગ્નિરુદ્ર ઋષયે નમઃ શિરસિ । અનુષ્ટુપ્છન્દસે નમઃ મુખે ।
આપદુદ્ધારકશ્રીબટુકભૈરવ દેવતાયૈ નમઃ હૃદયે ।
હ્રીં બીજાય નમઃ ગુહ્યે । ભૈરવીવલ્લભ શક્તયે નમઃ પાદયોઃ ।
નીલવર્ણો દણ્ડપાણિરિતિ કીલકાય નમઃ નાભૌ ।
સમસ્તશત્રુદમને સમસ્તાપન્નિવારણે સર્વાભીષ્ટપ્રદાને
વિનિયોગાય નમઃ સર્વાઙ્ગે ।
॥ ઇતિ ઋષ્યાદિ ન્યાસઃ ॥

અથ મૂલમન્ત્રઃ -
॥ ૐ હ્રીં વાં બટુકાય ક્ષ્રૌં ક્ષ્રૌ આપદુદ્ધારણાય
કુરુ કુરુ બટુકાય હ્રાં બટુકાય સ્વાહા ॥

॥ ઇતિ મૂલમન્ત્રઃ ॥

અથ ધ્યાનમ્ -
નીલજીમૂતસઙ્કાશો જટિલો રક્તલોચનઃ ।
દંષ્ટ્રાકરાલવદનઃ સર્પયજ્ઞોપવીતવાન્ ॥

દંષ્ટ્રાયુધાલંકૃતશ્ચ કપાલસ્રગ્વિભૂષિતઃ ।
હસ્તન્યસ્તકરોટીકો ભસ્મભૂષિતવિગ્રહઃ ॥
નાગરાજકટીસૂત્રો બાલમૂર્તિ દિગમ્બરઃ ।
મઞ્જુ સિઞ્જાનમઞ્જરી પાદકમ્પિતભૂતલઃ ॥
ભૂતપ્રેતપિશાચૈશ્ચ સર્વતઃ પરિવારિતઃ ।
યોગિનીચક્રમધ્યસ્થો માતૃમણ્ડલવેષ્ટિતઃ ॥
અટ્ટહાસસ્ફુરદ્વક્ત્રો ભ્રુકુટીભીષણાનનઃ ।
ભક્તસંરક્ષણાર્થાય દિક્ષુભ્રમણતત્પરઃ ॥

॥ ઇતિ ધ્યાનમ્ ॥

અથ સ્તોત્રમ્ ।
ૐ હ્રીં બટુકો વરદઃ શૂરો ભૈરવઃ કાલભૈરવઃ ।
ભૈરવીવલ્લભો ભવ્યો દણ્ડપાણિર્દયાનિધિઃ ॥ ૧॥

વેતાલવાહનો રૌદ્રો રુદ્રભ્રુકુટિસમ્ભવઃ ।
કપાલલોચનઃ કાન્તઃ કામિનીવશકૃદ્વશી ॥ ૨॥
આપદુદ્ધારણો ધીરો હરિણાઙ્કશિરોમણિઃ ।
દંષ્ટ્રાકરાલો દષ્ટોષ્ઠૌ ધૃષ્ટો દુષ્ટનિબર્હણઃ ॥ ૩॥

સર્પહારઃ સર્પશિરાઃ સર્પકુણ્ડલમણ્ડિતઃ ।
કપાલી કરુણાપૂર્ણઃ કપાલૈકશિરોમણિઃ ॥ ૪॥

શ્મશાનવાસી માંસાશી મધુમત્તોઽટ્ટહાસવાન્ ।
વાગ્મી વામવ્રતો વામો વામદેવપ્રિયઙ્કરઃ ॥ ૫॥
વનેચરો રાત્રિચરો વસુદો વાયુવેગવાન્ ।
યોગી યોગવ્રતધરો યોગિનીવલ્લભો યુવા ॥ ૬॥

વીરભદ્રો વિશ્વનાથો વિજેતા વીરવન્દિતઃ ।
ભૂતાધ્યક્ષો ભૂતિધરો ભૂતભીતિનિવારણઃ ॥ ૭॥

કલઙ્કહીનઃ કઙ્કાલી ક્રૂરકુક્કુરવાહનઃ ।
ગાઢો ગહનગમ્ભીરો ગણનાથસહોદરઃ ॥ ૮॥

દેવીપુત્રો દિવ્યમૂર્તિર્દીપ્તિમાન્ દીપ્તિલોચનઃ ।
મહાસેનપ્રિયકરો માન્યો માધવમાતુલઃ ॥ ૯॥

ભદ્રકાલીપતિર્ભદ્રો ભદ્રદો ભદ્રવાહનઃ ।

પશૂપહારરસિકઃ પાશી પશુપતિઃ પતિઃ ॥ ૧૦॥
ચણ્ડઃ પ્રચણ્ડચણ્ડેશશ્ચણ્ડીહૃદયનન્દનઃ ।
દક્ષો દક્ષાધ્વરહરો દિગ્વાસા દીર્ઘલોચનઃ ॥ ૧૧॥

નિરાતઙ્કો નિર્વિકલ્પઃ કલ્પઃ કલ્પાન્તભૈરવઃ ।
મદતાણ્ડવકૃન્મત્તો મહાદેવપ્રિયો મહાન્ ॥ ૧૨॥

ખટ્વાઙ્ગપાણિઃ ખાતીતઃ ખરશૂલઃ ખરાન્તકૃત્ ।
બ્રહ્માણ્ડભેદનો બ્રહ્મજ્ઞાની બ્રાહ્મણપાલકઃ ॥ ૧૩॥

દિગ્ચરો ભૂચરો ભૂષ્ણુઃ ખેચરઃ ખેલનપ્રિયઃ ।
સર્વદુષ્ટપ્રહર્તા ચ સર્વરોગનિષૂદનઃ ।
સર્વકામપ્રદઃ શર્વઃ સર્વપાપનિકૃન્તનઃ ॥ ૧૪॥

ઇત્થમષ્ટોત્તરશતં નામ્નાં સર્વસમૃદ્ધિદમ્ ।
આપદુદ્ધારજનકં બટુકસ્ય પ્રકીર્તિતમ્ ॥ ૧૫॥
એતચ્ચ શૃણુયાન્નિત્યં લિખેદ્વા સ્થાપયેદ્ગૃહે ।
ધારયેદ્વા ગલે બાહૌ તસ્ય સર્વા સમૃદ્ધયઃ ॥ ૧૬॥

ન તસ્ય દુરિતં કિઞ્ચિન્ન ચોરનૃપજં ભયમ્ ।
ન ચાપસ્મૃતિરોગેભ્યો ડાકિનીભ્યો ભયં ન હિ ॥ ૧૭॥

ન કૂષ્માણ્ડગ્રહાદિભ્યો નાપમૃત્યોર્ન ચ જ્વરાત્ ।
માસમેકં ત્રિસન્ધ્યં તુ શુચિર્ભૂત્વા પઠેન્નરઃ ॥ ૧૮॥

સર્વદારિદ્ર્યનિર્મુક્તો નિધિં પશ્યતિ ભૂતલે ।
માસદ્વયમધીયાનઃ પાદુકાસિદ્ધિમાન્ ભવેત્ ॥ ૧૯॥

અઞ્જનં ગુટિકા ખડ્ગં ધાતુવાદરસાયનમ્ ।
સારસ્વતં ચ વેતાલવાહનં બિલસાધનમ્ ॥ ૨૦॥
કાર્યસિદ્ધિં મહાસિદ્ધિં મન્ત્રં ચૈવ સમીહિતમ્ ।
વર્ષમાત્રમધીયાનઃ પ્રાપ્નુયાત્સાધકોત્તમઃ ॥ ૨૧॥

એતત્તે કથિતં દેવિ ગુહ્યાદ્ગુહ્યતરં પરમ્ ।
કલિકલ્મષનાશનં વશીકરણં ચામ્બિકે ॥ ૨૨॥

॥ ઇતિ કાલસઙ્કર્ષણતન્ત્રોક્ત
શ્રીબટુકભૈરવાષ્ટોત્તરશતનામસ્તોત્રં સમ્પૂર્ણમ્ ॥

Encoded and proofread by Gopal Upadhyay gopal.j.upadhyay at gmail.com
PSA Easwaran psaeaswaran at gmail.com

*ShrI Batukabhairava Ashtottarashatanama Stotram 2*

pdf was typeset on January 14, 2021

Please send corrections to *sanskrit@cheerful.com*